पित्तार्त्ति कफापहत्वम् । हृद्रोगमलार्त्तिवस्तिकारित्वम् । पुंस्त्वनाशित्वम् । अत्र स्थविराया गुणाढ्यत्वञ्च ॥ स्थूलैलागुणाः । रोचनत्वम् । तीक्ष्णत्वम् । लघुत्वम् । उष्णत्वम् । कफपित्तहृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनाशित्वञ्च । इति राजनिर्घण्टः ॥

स्थूलोच्चयः, पुं, (स्थूलानामुच्चयो यत्र ।) गण्डोपलः । गजानां मध्यमगतिः । (यथा, माघे । १२ । १६ ।

स्थूलोच्चयेनागमदन्तिकागतां
गजोऽग्रयातावकरः करेणुकाम् ॥”)

असाकल्यम् । वरण्डः । इति मेदिनी ॥ हस्तिदन्तरन्ध्रम् । इति शब्दमाला ॥

स्थेयः, पुं, (तिष्ठति विवादनिर्णयार्थमस्मिन्निति । स्था + यत् ।) विवादपक्षस्य निर्णेता । (यथा, राजतरङ्गिण्याम् । ६ । १३ ।

“कार्त्तान्तिको भिषक् सभ्यः गुरुर्मन्त्री पुरोहितः
दूतः स्थेयो लेखको वा न तदाभूदपण्डितः ॥”)

पुरोहितः । इति मेदिनी ॥ स्थिरतरे, त्रि । इति हेमचन्द्रः ॥ (क्ली, स्था + भावे यत् । स्थातव्यम् । यथा, हरिवंशे । ८५ । ७ ।

“बलिनः सन्निकर्षे तु न स्थेयं पण्डितेन वै ।
अपक्रामेद्धि कालज्ञः समर्थो युद्धमावहेत् ॥”)

स्थेयान् [स्] त्रि, (अयमनयोरतिशयेन स्थिरः । स्थिर + ईयसुन् । “प्रियस्थिरेति ।” ६ । ४ । १५७ । इति स्थादेशः ।) स्थिरतरः । इत्यमरः । ३ । १ । ७३ ॥ (यथा, महागणपतिस्तोत्रे । १५ ।

“श्रेयः स्थेयः स देयान मम विमलदृशो बन्धुरं
सिन्धुरास्यः ॥”)

शाश्वतः । इति भरतः ॥

स्थेष्ठः, त्रि, (अयमेषामतिशयेन स्थिरः । स्थिर + इष्ठन् । “प्रियस्थिरेति । ६ । ४ । १५७ । इति स्थादेशः ।) अतिस्थिरः । इति हेमचन्द्रः ॥

स्थैर्य्यं, क्ली, (स्थिरस्य भावः । स्थिर + ष्यञ् ।) स्थिरत्वम् । गर्भस्थस्याङ्गानां स्थैर्य्यं चतुर्थे मासि भवति । इति सुखबोधः ॥ (यथा, याज्ञवल्क्यः । ३ । ८० ।

“स्थैर्य्यं चतुर्थे त्वङ्गानां पञ्चमे शोणितोद्भवः ।
षष्ठे बलस्य वर्णस्य नखरोम्णाञ्च सम्भवः ॥”*॥

दृढ़ता । यथा, महाभारते । ६ । १३ । ८ ।

“महेन्द्रसदृशः शौर्य्ये स्थैर्य्ये च हिमवानिव ।
समुद्र इव गाम्भीर्य्ये सहिष्णुत्वे धरासमः ॥”)

स्थौरी, [न्] पुं, भारवाहकाश्वः । इति भरतद्विरूपकोषः ॥

स्थौलेयं, क्ली, (स्थूणायां भवम् । स्थूणा + ढक् ।) ग्रन्थिपर्णनामकगन्धद्रव्यम् । इत्यमरः । २ । ४ । १३२ ॥ गाँठियाला इति भाषा ॥ अथ ग्रन्थिपर्णस्यैव भेदः । ईषत्सुगन्धि स्थौणेयं थुनेर इति लोके ।

“स्थौणेयकं बर्हिबर्हं शुकबर्हञ्च कुक्कुरम् ।
शीर्णं रोम शुकं चापि शुकपुष्पं शुकच्छदम् ॥
स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत्
मेधाशुक्रकरं त्वच्यं रक्षोऽश्रीज्वरजन्तुजित् ॥
हन्ति कुष्ठास्रतृड्दाहदौर्गन्ध्यतिलकालकान् ॥”

अथ ग्रन्थिपर्णस्यैव भेदो भण्डिउर इति नेपालदेशे भवति ।

“निशाचरो धनहरः कितवो गणहासकः ।
रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः ॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान् ।
रक्षोऽश्रीस्वेदमेदोऽस्रज्वरगन्धविषव्रणान् ॥”
इति भावप्रकाशः ॥

स्थौणेयकं, क्ली, (स्थौणेयमेव । स्वार्थे कन् ।) सुगन्धद्रव्यभेदः । थुनिरा इति हिन्दी भाषा । तत्पर्य्यायः । बर्हिशिखम् २ शुकच्छदम् ३ मयूरचूड़म् ४ शुकपुच्छकम् ५ विकीर्णरोम ६ कीरवर्णकम् ७ विकीर्णसंज्ञम् ८ हरितम् ९ । अस्य गुणाः । कफवातनाशित्वम् । सुगन्धित्वम् । कटुत्वम् । तिक्तत्वम् । पित्तप्रकोपशमनत्वम् । बलपुष्टिविवर्द्धनत्वञ्च । इति राजनिर्घण्टः । भावप्रकाशोक्तगुणपर्य्यायौ पूर्व्वोक्तशब्दे द्रष्टव्यौ ॥

स्थौरी, [न्] पुं, खरवृषभवत् पृष्ठेन भारवाहकोऽश्वः । तत्पर्य्यायः । पृष्ठ्यः २ । इत्यमरः २ । ८ । ४६ ॥ द्वे खरवृषभवत् पृष्ठेन भारवाहकेऽश्वे । पृष्ठेन वहति पृष्ठस्थमपि बाह्यमुपचारात् तद्वहति वा पृष्ठ्यः ढघे कादिति यः । स्थूल्यते संव्रियते पृष्ठमनया स्थूरा स्थूलत् क ङ बृंहणेऽ सेमक्तात् सरोरिति अः निपातनात् लस्य रत्वं स्थूरा पर्य्ययणं तस्या इदमिति ष्णो स्थौरं पृष्ठारोपितभारादिकं तदस्त्यस्येति इनि स्थौरी स्थूरी च स्थौरीति स्वामी । इति भरतः ॥

स्थौलशीर्षं, त्रि, (स्थूलशिरस इदमिति । स्थूलशिरस् + अण् । “अचि शीर्षः ।” ६ । १ । ६२ । इति शीर्षादेशः ।) वृहन्मस्तकसम्बन्धि । इति काशिका ॥

स्थौल्यं, त्रि, (स्थूलस्य भावः । स्थूल + ष्यञ् ।) स्थूलता । (यथा, भागवते । ३ । ११ । ३ ।

“एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च
सत्तम ॥”)

स्नपनं, क्ली, (स्ना + णिच् + ल्युट् ।) स्नानम् । यथा, दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वे ।

“पूजनात् स्नपनं श्रेष्ठं स्नपनात्तर्पणं स्मृतम् ।
तर्पणाच्चामदानन्तु महिषाजनिपातनम् ॥”

स्नपितः, त्रि, (स्ना + णिच् + क्तः ।) कृतस्नानः । (यथा, गीतगोविन्दे । १२ । १ ।

“गतवति सखीवृन्दे मन्दत्रपाभरनिर्भर-
स्मरशरवशाकूतस्फीतस्मितस्नपिताधराम् ॥”)

स्नवः, पुं, (स्नु प्रस्रवणे + “ऋदोरप् ।” इत्यप् ।) स्रवणम् । चरणम् । इत्यमरः । ३ । २ । ८ ॥

स्नसा, स्त्री, स्नायुः । इति हेमचन्द्रः ॥

स्नातः, त्रि, (स्ना + क्तः ।) कृतस्नानः । यथा,—

स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि
अस्नातस्य क्रियाः सर्व्वा भवन्ति हि यतोऽफलाः
प्रातः समाचरेत् स्नानमतो नित्यमतन्द्रितः ॥”
इति प्रायश्चित्ततत्त्वम् ॥

स्नातकः, पुं, (स्नात एव । स्ना + “यावादिभ्यः कन् ।” ५ । ४ । २९ । इति स्वार्थे कन् ।) आप्लुतव्रती । इत्यमरः । २ । ७ । ४३ ॥ द्वे समाप्तवेदाध्ययने स्नानशीले स्नातं स्नानं शीलमस्य । स्नातकः विकारसंघेति कः । आप्लुतं स्नानं तत्र व्रती नित्यस्नायी । स्ना प्लुत्यां भावे क्तः आप्लवव्रतीति क्वचित् पाठः । ब्रह्मचर्य्यं त्यक्त्वा यो गृहाश्रमं गतः स स्नातकः । समाप्तवेदाध्ययनो यः स्नानशीलः आश्रमान्तरं न गतः सोऽपि स्नातकः । स्नातकस्त्रिविधः । ब्रह्मचर्य्याचरणस्य यः शास्त्रबोधितोऽवधिः । तावद्व्रतमुपास्यासमाप्तवेद एवाश्रमान्तरं गतो यः स व्रतस्नातकः । वेदमधीत्यगुरुसन्निधौ वेदाभ्यासं यः करोति स विद्यास्नातकः । पालितसम्यग्व्रतः प्राप्तवेदो यो द्वितीयाश्रमं गतः स उभयस्नातकः । इति टीकान्तरे । इति भरतः ॥

स्नानं, क्ली, (स्ना + ल्युट् ।) मज्जनम् । अवगाहनम् । तत्पर्य्यायः । आप्लावः २ आप्लवः ३ । इत्यमरः । २ । ६ । १२१ ॥ अभिषेकः ४ इति शब्दरत्नावली ॥ उपस्पर्शनम् ५ सवनम् ६ सर्जनम् ७ । इति जटाधरः ॥ तदनुकल्पः सप्तविधः । मान्त्रम् १ भौमम् २ आग्नेयम् ३ वायव्यम् ४ दिव्यम् ५ वारुणम् ६ मानसम् ७ । एतेषां विवरणं पश्चात् स्फुटीभविष्यति ॥ * ॥ अस्य गुणाः ।

“स्नानं पवित्रमायुष्यं श्रमस्वेदमलापहम् ।
शरीरबलसन्धानं केश्यमोजस्करं परम् ॥
उष्णाम्बुनाधःकायस्य परिषेको बलावहः ।
तेनैव तूत्तमाङ्गस्य बलहृत् केशचक्षुषोः ॥
विनिहन्ति शिरः स्नानं हृष्णातात्वास्यशोष-
णम् ।
मलोष्णपीड़काकण्डूं शिरोरोगांश्च पैत्तिकान् ॥
मधुकामलकैः स्नानं पित्तघ्नं तिमिरापहम् ।
स्नानं वचाघनैरिष्टं श्लेष्मघ्नं तिमिरापहम् ॥
स्नानं कृष्णतिलैश्चापि चक्षुष्यमनिलापहम् ।
अस्नातस्य शरीरस्य उष्मा सर्व्वाङ्गगोचरः ॥
स्नानेनैकत्वमायाति तेन दीप्यति पावकः ।
स्नानमर्हितनेत्रास्यकर्णरोगातिसारिषु ॥
आध्मानपीनसाजीर्णभुक्तवतस्तु च गर्हितम् ।
दौर्गन्ध्यं गौरवं कण्डूं कच्छूं मलमरोचकम् ।
स्वेदं वीभत्सतां हन्ति शरीरपरिमार्ज्जनम् ॥”
इति राजवल्लभः ॥*॥

अथ स्नानविधिः । दक्षः ।

“चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् ।
तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले ॥”

कुर्य्यादिति शेषः । तथा च ।

“अस्नात्वा चाप्यहुत्वा च भुङ्क्तेऽदत्त्वा च
यो नरः ।
देवादीनामृणी भूत्वा नरकं प्रतिपद्यते ॥”*॥